## ऋतेरीयङ् । (२९/२४२२)

ऋतिः सौत्रो धातुः घृणायां वर्तते,[1] ततः ईयङ प्रत्ययो भवति । ङकार आत्मनेपदार्थः । ऋतीयते, ऋतीयेते, ऋतीयन्ते । [2]ईयङवचनं ज्ञापनार्थं, धातुविहितानां प्रत्ययानामायन्नादयो न भवन्ति [3]इति ॥

## कमेर्णिङ् । (३०/२३१०)

कमेर्धातोः [4]णिङ प्रत्ययो भवति । णकारो वृद्ध्यर्थः । ङकार आत्मनेपदार्थः । कामयते, कामयेते, कामयन्ते ॥

## आयादय आर्धधातुके वा । (३१/२३०५)

आर्धधातुकविषये आर्धधातुकविवक्षायामायादयः [5]प्रत्यया वा भवन्ति । गोप्ता, गोपायिता । अर्तिता, ऋतीयिता । कमिता, कामयिता । नित्यं प्रत्ययप्रसङ्गे तदुत्पत्तिरार्धधातुकविषये विकल्प्यते, तत्र यथायथं [6]प्रत्यया भवन्ति । गुप्तिः । गोपाया[7] ॥

## सनाद्यन्ता धातवः । (३२/२३०४)

[8]सन् आदिर्येषां ते सनादयः । सनादयोऽन्ते येषां ते[9] सनाद्यन्ताः । सनाद्यन्ताः समुदायाः धातुसञ्ज्ञाः भवन्ति । प्रत्ययग्रहणपरिभाषैव पदसञ्ज्ञायामन्तवचनेन लिङ्गेन प्रतिषिद्धा सती पुनरिहान्तवचनेन प्रतिप्रसूयते । चिकीर्षति[10] । पुत्रीयति । पुत्रकाम्यति[11] ॥

## स्यतासी लृलुटोः । (३३/२१८६)

[12]लृरूपमुत्सृष्टानुबन्धं [13]सामान्यमेकमेव । तस्मिन् [14]लुटि च परतो धातोर्यथासङ्ख्यं स्यतासी प्रत्ययौ भवतः । करिष्यति । अकरिष्यत् । श्वः कर्ता । इदित्करणमनुनासिकलोपप्रतिषेधार्थम् (६.४.२४/४१५) । मन्ता । सङ्गन्ता ॥

## सिब्बहुलं लेटि । (३४/३४२९)

धातोः सिप् प्रत्ययो भवति बहुलं लेटि परतः । जोषिषत् (ऋ. २.३५.१) । तारिषत् (ऋ. १.२५.१२) । मन्दिषत् । न च भवति । '[15]पताति दिद्युत्' (ऋ. ७.२५.१) । '(प्रजापतिः) उदधिं [16]च्यावयाति' (तै. ३.५.५.५) ॥

## कास्प्रत्ययादाममन्त्रे लिटि । (३५/२३०६)

'कासृ शब्दकुत्सायाम्' (धा.पा. ६२३), ततः[17] प्रत्ययान्तेभ्यश्च[18] धातुभ्यः आम् प्रत्ययो भवति लिटि परतोऽमन्त्रविषये । कासाञ्चक्रे । प्रत्ययान्तेभ्यः — लोलूयाञ्चक्रे[19] । अमन्त्रे इति किम् ? 'कृष्णो नोनाव' (ऋ. १.७९.२) ॥

---

1. इति अ.ह. 2. ऋतेः छङ इति सिद्धे इत्यधिकम् ब.क.ड.इ.फ.ग. 3. इति नास्ति ह. 4. णीङ ह. 5. प्रत्ययाः नास्ति अ. 6. प्राग्वदार्धधातुकप्रत्ययाः ह. 7. आय इयङ णिङ, आयादि इत्यधिकम् ड. 8. वाक्यमिदं नास्ति अ. 9. इमे इत्यधिकम् क. 10. जिहीर्षति इत्यधिकम् ह. 11. सन् कन् काम्यच् सनादिः इत्यधिकम् ड. 12. लृ इति रूपम् क. 13. सामान्यमेव क.ह. 14. लृङि, लृटि इत्यधिकम् क. 15. पदाति ड, पदातीति विद्युत् क. 16. व्यावज्यति क, नास्ति ड. 17. च इत्यधिकम्. 18. च नास्ति ह. 19. पोपूयांचक्रे ह.